# उत्कलपीठेन समायोजिता द्विदिवसीयान्तर्जालीयराष्ट्रियसङ्गोष्ठी



## विषयः - "अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः"




तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्य उत्कलपीठेन "अतोऽस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः"इतिविषयमवलम्ब्य 03.02.2021 तः 04.02.2021 दिनाङ्कं यावद् दिनद्वयात्मिका अन्तर्जालीयराष्ट्रियसङ्गोष्ठी समायोजिता। सङ्गोष्ठ्या अस्याः समुद्घाटनसमारोहे विद्यापीठस्य मान्याः कुलपतयः प्रो.वि.मुरलीधरशर्ममहोदयाः आध्यक्ष्यं निरुह्य स्वीयभाषणे श्रीजगन्नाथमहाप्रभोः महत्त्वमाधारीकृत्य समालोचनमकुर्वन् । श्रीजगन्नाथसम्बद्धानां सांस्कृतिकसामाजिकतत्त्वान्याधा



रीकृत्य सर्वतोभावेन समाजस्य उपकारो भविष्यतीति उदघोषयन् । राष्ट्रियसंस्कृतविश्वविद्यालयस्यास्य प्राक्तनकुलपतयः तथा भुवनेश्वरस्थस्य किस् (KISS )विश्वविद्यालयस्य कुलपतयः प्रो. हरेकृष्णशतपथीमहोदयाः मुख्यातिथिरूपेण समागत्य भगवतः श्रीजगन्नाथस्य संस्कृतेः वैशिष्ट्यं प्रतिपादितवन्तः ।



कुञ्चिकाभाषणार्थं भारतसर्वकारस्य अवसरप्राप्ताः भारतीयप्राशासनिकसेवाधिकारिणः श्रीमन्तः क्रियाशीलाः डा. सुवासपाणिमहोदयाः समागत्य जयदेवस्य गीतगोविन्दमाधारीकृत्य भगवतः श्रीजगन्नाथमहाप्रभोः महत्त्वमालोचनमकुर्वन्। सारस्वतातिथिरूपेण भुवनेश्वरस्य



श्रीजगन्नाथसंस्कृतिगवेषकाः तथा युवलेखकरूपेण सुपरिचिताः डा. कृष्णकेशवषडङ्गीमहोदयाः उपस्थाय श्रीजगन्नाथस्य लौकिक-वैदिकत्वविषये आलोचनं कृतवन्तः । उत्कलपीठस्य मार्गदर्शकाः प्रो.जि.एस्.आर्. कृष्णमूर्तिमहाभागाः स्वागतभाषणं प्रदत्तवन्तः। उत्कलपीठस्य अन्यतममार्गदर्शकाः प्रो. राधागोविन्दत्रिपाठिमहोदयाः धन्यवादं



समर्पितवन्तः। सङ्गोष्ठ्यामस्याम् ओडिशा-कर्णाटक-तेलेङ्गाणा-केरल-तामिलनाडु-महाराष्ट्र-आन्ध्रप्रदेशादिविभिन्नेभ्यः प्रदेशेभ्यः वरिष्ठाः आचार्याः छात्राश्च अन्तर्जालेन संयोजिताः ।




संगोष्ठ्याः स्वस्तिवाचनिकमहोत्सवः 04.02.2021 दिनाङ्के प्रातः एकादशवादने समभवत् । तत्र विश्वविद्यालयस्यास्य शैक्षिसङ्कायप्रमुखाः प्रो. राणीसदाशिवमूर्त्तिमहाभागाः आध्यक्ष्यं निरुह्य जगन्नाथसंस्कृतिम् अधिकृत्य स्तोत्रकाव्यानामुपरि भक्तिरसस्य प्राधान्यविषये आलोचितवन्तः । अत्र मुख्यातिथिरूपेण पुरीतः श्रीजगन्नाथगवेषणाः प्रतिष्ठानस्याध्यक्षाः डा. नरेशचन्द्रदाशमहोदयाः समागताः । तैः स्वीयभाषणे भगवतः






श्रीजगन्नाथस्य मन्दिरे प्राचल्यमानेषु विविधेषुकार्यक्रमस्यविहङ्गावलोकनम्कृतम्। उत्कलपीठस्यसंयोजकाः डॉ.निरञ्जनमिश्रमहोदयाः प्रतिवेदनपत्रं तथा सम्पूर्णकार्यक्रमं समचालयन् । उत्कलपीठस्य शोधसहायकाः डॉ.प्रसन्नकुमारपण्डामहोदयाः धन्यवादं समर्पितवन्तः। इत्थं द्विदिवसीयराष्ट्रियसंगोष्ठी सुसम्पन्ना। राष्ट्रियसंस्कृतविश्वविद्यालयस्य ज्यौतिषवास्तुविभागेन प्रतिसप्ताहं सोमवासरे विविधविषयोपेतः व्याख्यानकार्यक्रमः समायोज्यते ।

## ज्यौतिषवास्तुविभागस्य व्याख्यानमाला




तत्र देशविदेशेषु प्रतिष्ठिता विद्वांसः नानाविषयेषु उद्बोधनं कुर्वन्ति । ज्यौतिषविभागस्य अध्यक्षाणाम् आचार्याणां राधाकान्तठाकूरमहोदयानाम् आध्यक्ष्ये इयं व्याख्यानमाला विभागीयैः समायोज्यते।

तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्थस्य उत्कलपीठं











# उत्कलदिवससमारोहः - २०२१






तथा उत्कलपरिषत् (तिरुपति) इत्यनयोः संयुक्ताध्वर्यवे उत्कलदिवससमारोहः एप्रिलमासस्य प्रथमदिनाङ्के अन्तर्जालमाध्यमेन परिपालितः। कार्यक्रमेऽस्मिन् समुद्घाटनसमारोहे विद्यापीठस्यास्य मान्याः कुलपतयः प्रो. वि.मुरलीधरशर्ममहोदयाः आध्यक्ष्यं निरुह्य स्वीयभाषणे उत्कलस्य संस्कृतिं तथा उत्कलभाषया सह संस्कृतभाषायाः सम्पर्कविषये न्यरूपयन्। गुजरातस्थस्य श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. गोपबन्धुमिश्रमहोदयाः मुख्यातिथिरूपेण समागत्य उत्कलस्य ऐतिह्यं तथा उत्कलीयसंस्कृतिविषये आलोचितवन्तः । उत्कलपीठस्य मार्गदर्शकाः प्रो.जि.एस्.आर्. कृष्णमूर्तिमहाभागाः स्वागतभाषणं प्रदत्तवन्तः।उत्कलपीठस्यसंयोजकाः डॉ.निरञ्जनमिश्रमहोदयाः सम्पूर्णकार्यक्रमं समचालयन् । उत्कलपरिषदः अध्यक्ष्याः प्रो. सत्यनारायणाचार्यमहोदयाः धन्यवादं समर्पितवन्तः । कार्यक्रमेऽस्मिन् शताधिकाः छात्राः अध्यापकाश्च अन्तर्जालमाध्यमेन संयोजिताः ।








शिक्षकसहयोगिकर्मकरः श्रीमान् टि.गोविन्दराजः २४.०४.२०२१ दिनाङ्के स्वयंप्रेरितनिवृत्तिं स्व्यकरोत् ।

## विभागाध्यक्षत्वेन नियुक्तिः



साहित्यविभागस्य आचार्याः च. रङ्गनाथन्महोदयाः
१२.०२.२०२१ दिनाङ्के साहित्यविभागाध्यक्षत्वेन नियुक्ताः

## ज्यौतिषवास्तुविभागे नवनियुक्तिः



Shri Balakram sarswat